योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १९३

त्रिनवत्यधिकशततमः सर्गः १९३

श्रीराम उवाच ।

अनादिमध्यपर्यन्तं न देवा नर्षयो विदुः ।

यत्पदं तदिदं भाति क्व जगत्क्व च दृश्यता ।। १

द्वैताद्वैतसमुद्भेदवाक्यसंदेहविभ्रमैः ।

अलमस्माकमाशान्तमाद्यं रूपमनामयम् ।। २

व्योमनि व्योमभावानां प्रशान्तं यादृगासितम् ।

तादृक्चिद्व्योमनि स्फारत्रिजगद्व्योमभासनम् ।। ३

यथा व्योमनि व्योमत्वं दृषत्त्वं दृषदि स्थितम् ।

जलत्वं च जलस्यान्तर्जगत्त्वं चिद्घने तथा ।। ४

साहंतादिजगद्दृश्यमाशाकाशविसार्यपि ।

महाचिदुदरं विद्धि खं शान्तं शून्यतोदितम् ।। ५

जीवस्यास्मिन्विमूढस्य परेऽपरिमितोदये ।

प्रस्फुरंश्चापि संसारपिशाच उपशाम्यति ।। ६

भेदोपलब्धिर्गलति व्यवहारवतोऽप्यलम् ।

जडस्येवाजडस्यैव वीचेरिव जलोदरे ।। ७

क्वाप्यज्ञानरवौ याते प्रतापाद्याकरे भृशम् ।

संसारसत्तादिवसो यात्यस्तं स निशागमः ।। ८

भावाभावेषु कार्येषु जरामरणजन्मसु ।

ज्ञ आजवं जवीभावे तिष्ठन्नपि न तिष्ठति ।। ९

नाविद्यास्ति ह न भ्रान्तिर्न दुःखं न सुखोदयः ।

विद्याऽविद्या सुखं दुःखमिति ब्रह्मैव निर्मलम् ।।१०

परिज्ञातं सदेतत्तु यावद्ब्रह्मैव निर्मलम् ।

अपरिज्ञातमस्माकमब्रह्मात्म न विद्यते ।। ११

प्रबुद्धोऽस्मि प्रशान्ता मे सर्वा एव कुदृष्टयः ।

शान्तं समं सोहमिदं खं पश्यामि जगत्त्रयम् ।। १२

सम्यग्ज्ञातं यावदिदं जगद्ब्रह्मैव केवलम् ।

अज्ञातात्माभवद्ब्रह्म ज्ञातात्मन्यधुना स्थितम् ।। १३

ज्ञाताज्ञातमनिर्भासं ब्रह्मैकमजरं तथा ।

शून्यत्वैकत्वनीलत्वरूपमेकं नभो यथा ।। १४

निर्वाणमासे गतशङ्कमासे

निरीहमासे सुसुखेऽहमासे ।

यथास्थितं नित्यमनन्तमासे

तदेवमासे न कथं समासे ।। १५

सर्वं सदैवाहमनन्तमेकं

न किंचिदेवाप्यथवातिशान्तः ।

सर्वं न किंचिच्च सदेकमस्मि

न चास्मि चेतीयमहो नु शान्तिः ।। १६

अधिगतमधिगम्यं प्राप्तमप्राप्तमन्यै-

गतमिदमलमस्तं वस्तुजातं समस्तम् ।

उदितमुदितबोधं तादृशं यत्र भूयो-

ऽस्तमयसमुदयानां नाम नामापि नास्ति ।। १७

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० वश्रान्तिकथनं नाम त्रिनवत्यधिकशततमः सर्गः ।। १९३ ।।